वैयाकरणसिद्धान्तकौमुदी

अजन्तपुँल्लिङ्गप्रकरणम् (१०)

१२.०१.२०११

पुनरावर्तनम् – सर्वनामसंज्ञाप्रकरणम्

- सर्वादीनि सर्वनामानि
- पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्
- स्वमज्ञातिधनाख्यायाम्
- अन्तरं बहिर्योगोपसंव्यानयोः
- पूर्वादिभ्यो नवभ्यो वा
- न बहुव्रीहौ
- संज्ञोपसर्जनीभूतास्तु न सर्वादयः

२२३. तृतीयासमासे (१.१.३०)

- एकपदात्मकं सूत्रम् ।
- ‘सर्वादीनि सर्वनामानि’ (१.१.२६) इति, ‘न बहुव्रीहौ’ (१.१.२९) इत्यतः ‘न’ इति च अनुवर्तते ।
- इह सर्वनामता न स्यात् ।
- मासेन पूर्वः मासपूर्वः, तस्मै - मासपूर्वाय ।
- तृतीयासमासार्थवाक्येऽपि न ।
- मासेन पूर्वाय ।

२२४. द्वन्द्वे च (१.१.३१)

- द्विपदात्मकं सूत्रम् ।
- 'सर्वादीनि सर्वनामानि' (१.१.२६) इति, 'न बहुव्रीहौ' (१.१.२९) इत्यतः 'न' इति च अनुवर्तते ।
- द्वन्द्वे उक्तसंज्ञा न ।
- वर्णाश्च आश्रमाश्च इतराश्च, तेषाम् – वर्णाश्रमेतराणाम् ।
- समुदायस्यैव अयं निषेधः, न त्ववयवानाम् ।
- 'आमि सर्वनाम्नः सुट्' (७.१.५२) – सर्वनाम्नः इति पञ्चमी । सर्वनाम्नः परस्य आमः सुट् इत्यर्थः यदि स्वीक्रियते, तर्हि अत्रापि सुट् स्यात् ।
- न च एवं तदन्तविधिना सुट्-प्रसङ्गः । सर्वनाम्नो विहितस्य आमः सुट् इति व्याख्यातत्वात् ।

२२५. विभाषा जसि (१.१.३२)

- पदद्वयम् ।
- ‘द्वन्द्वे च’ (१.१.३१) इत्यतः ‘द्वन्द्वे’ इति अनुवर्तते ।
- जसाधारं यत् कार्य्ं शीभावाख्यं तत्र कर्तव्ये द्वन्द्वे उक्ता संज्ञा वा स्यात् ।
- वर्णाश्रमेतरे, वर्णाश्रमेतराः ।
- शीभावं प्रत्येव विभाषेत्युक्तम्, अतो न अकच्, किन्तु कप्रत्यय एव ।
- वर्णाश्रमेतरकाः ।
- ‘द्वन्द्वे च’ इति सर्वनामत्वनिषेधः।

२२६. प्रथमचरमतयाल्पार्धकतिपयनेमाश्च (१.१.३३)

- पदद्वयम् । प्रथम-चरम-तय-अल्प-अर्ध-कतिपय-नेमाः, च ।
- 'विभाषा जसि' (१.१.३२) इति अनुवर्तते ।
- एते जसः कार्यं प्रति उक्तसंज्ञाः वा स्युः ।
- प्रथमे, प्रथमाः ।
- शेषं रामवत् ।
- तयप् प्रत्ययः, ततः तदन्ता ग्राह्याः । द्वितये, द्वितयाः ।
- शेषः रामवत् ।
- नेमे, नेमाः ।
- शेषं सर्ववत् ।

विभाषाप्रकरणे तीयस्य ङित्सु उपसंख्यानम् (वा)

- द्वितीयस्मै, द्वितीयाय इत्यादि ।
- द्वयोः पूरणः द्वितीयः । ‘द्वेस्तीयः’ इति तीयप्रत्ययः ।
- द्वितीयस्मात्, द्वितीयात् ।
- द्वितीयस्मिन्, द्वितीये ।
- एवं तृतीयाय ।
- त्रयाणां पूरणः तृतीयः । ‘त्रेः संप्रसारणं च’ इति तीयः ।
- अर्थवद्ग्रहणान्नेह ।
- पटुजातीयाय – ‘प्रकारवचने जातीयर्’ ।
- अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् (प)

- रामः
  - ससजुषो रुः
  - खरवसानयोर्विसर्जनीयः
- रामौ
  - वृद्धिरेचि
- रामाः
  - प्रथमयोः पूर्वसवर्णः
  - ससजुषो रुः
  - खरवसानयोर्विसर्जनीयः

- हे राम
  - एङ्ह्रस्वात् सम्बुद्धेः
- हे रामौ
  - वृद्धिरेचि
- हे रामाः
  - प्रथमयोः पूर्वसवर्णः
  - ससजुषो रुः
  - खरवसानयोर्विसर्जनीयः

- रामम्
  - अमि पूर्वः
- रामौ
  - वृद्धिरेचि
- रामान्
  - प्रथमयोः पूर्वसवर्णः
  - तस्माच्छसो नः पुंसि

- रामेण
  - टाङसिङसामिनात्स्याः
  - आद्गुणः
  - अट्कुप्वाङ्नुम्व्यवायेऽपि
- रामाभ्याम्
  - सुपि च
- रामैः
  - अतो भिस ऐस्
  - वृद्धिरेचि
  - ससजुषो रुः
  - खरवसानयोर्विसर्जनीयः

- रामाय
  - ङेर्यः
  - सुपि च
- रामाभ्याम्
  - सुपि च
- रामेभ्यः
  - बहुवचने झल्येत्
  - ससजुषो रुः
  - खरवसानयोर्विसर्जनीयः

- रामात्
  - टाङसिङसामिनात्स्याः
  - अकः सवर्णे दीर्घः
- रामाभ्याम्
  - सुपि च
- रामेभ्यः
  - बहुवचने झल्येत्
  - ससजुषो रुः
  - खरवसानयोर्विसर्जनीयः

- रामस्य
  - टाङसिङसामिनात्स्याः
- रामयोः
  - ओसि च
  - एचोऽयवायावः
  - ससजुषो रुः
  - खरवसानयोर्विसर्जनीयः
- रामाणाम्
  - ह्रस्वनद्यापो नुट्
  - नामि
  - अट्कुप्वाङ्नुम्व्यवायेऽपि

- रामे
  - आद्गुणः
- रामयोः
  - ओसि च
  - एचोऽयवायावः
  - ससजुषो रुः
  - खरवसानयोर्विसर्जनीयः
- रामेषु
  - बहुवचने झल्येत्
  - आदेशप्रत्यययोः

- सर्वे
  - जसः शी
  - आद्गुणः
- सर्वस्मै
  - सर्वनाम्नः स्मै
- सर्वस्मात्
  - ङसिङ्योः स्मात्स्मिनौ
- सर्वेषाम्
  - आमि सर्वनाम्नः सुट्
  - बहुवचने झल्येत्
  - आदेशप्रत्यययोः
- सर्वस्मिन्
  - ङसिङ्योः स्मात्स्मिनौ